International Journal of Applied Research 2015; 1(3): 198-203




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 3.4
IJAR 2015; 1(3): 198-203
www.allresearchjournal.com
Received: 15-12-2014
Accepted: 18-01-2015

**डॉ. अशोक कुमार झा**
व्याख्याता (व्याकरण),
राजकीय धूलेश्वर आचार्य
संस्कृत महाविद्यालय,
मनोहरपुर, जयपुर,
राजस्थान, भारत

**Corresponding Author:**
**डॉ. अशोक कुमार झा**
व्याख्याता (व्याकरण),
राजकीय धूलेश्वर आचार्य
संस्कृत महाविद्यालय,
मनोहरपुर, जयपुर,
राजस्थान, भारत

# महाभाष्यानुसारं शिक्षा

**डॉ. अशोक कुमार झा**

**सारांश**
वर्तमानशिक्षापद्धतौ आङ्गलप्रभाव: स्पष्टतया परिलक्ष्यते। यदि भारतीयपरिस्थितौ वैदेशिक्याः प्रक्रियायाः अनुसरणं भवति चेत् शिक्षायाः सहजता गच्छति कृत्रिमता च स्थानमधिगच्छति। कृत्रिमतायाः प्रभावेणैव शिक्षा केवलं स्वसङ्कुचितार्थमेव प्रकटयति। एतादृश्यामवस्थायां शिक्षायाभारतीयकरणस्यावश्यकता भवति :। यदि शिक्षायाः भारतीयकरणं भविष्यति चेत् शिक्षा स्वस्य शतप्रतिशतं सहयोगं प्रदाय विकासे आधारस्य प्रस्तरो भविष्यति। तदर्थं वेदेषु वेदाङ्गेषु, पुराणेषु, विविधशास्त्रेषु निहितानां सिद्धान्तानामावश्यकताऽस्ति परिशीलनस्य। पातञ्जलमहाभाष्ये सन्ति तानि तत्वानि यानि शिक्षायाः भारतीयकरणे सहायकानि।

**कूटशब्द:** महाभाष्यानुसारं शिक्षा, वर्तमानशिक्षापद्धतौ आङ्गलप्रभाव:, भारतीयपरिस्थितौ

## प्रस्तावना

पातञ्जलमहाभाष्यं व्याकरणसम्प्रदाये आकरग्रन्थत्वेन समाद्रियते । ग्रन्थोऽयं व्याकरणप्रधानग्रन्थः । "प्रवृर्तिं प्रति इष्टसाधनत्वज्ञानस्यहेतुत्वेन" इत्युक्तेः पातञ्जलमहाभाष्यशिक्षोद्देश्यजिज्ञासा स्वभावतः समुदेति यत् कानि पुनः महाभाष्यशिक्षोद्देश्यानि । व्याकरणप्रधानत्वाद् व्याकरणसम्मतानि । पस्पशाह्निके शिक्षोद्देश्यानि सम्यग्प्रतिपादितानि । तानि अधस्तात् यथाक्रमं प्रस्तूयन्ते ।

### परमपरमोद्देश्यं मोक्षप्राप्तिः

महाभाष्यानुशीलनेन दृष्टिपथमायाति यत् महाभाष्यशिक्षायाः प्रधानतमोद्देश्यं मोक्षप्राप्तिरिति। तदुक्तं "महता देवेन नः साम्यं यथा स्यादिति"[1] अर्थात् महान्देवः शब्दवृषभः तेन साकं नः =अस्माकम् साम्यं -सायुज्यं यथा स्यात् तदर्थमस्माभिः शास्त्राध्ययनं कर्तव्यम्। शब्दवृषभ एव महान् देव इति प्रतिपादयन्नाह भर्तृहरि- :

"अपिप्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते"[2]।।

मोक्षसिद्धिः प्रधानतमोद्देश्यत्वेनाधिग्रहणाय भर्तृहरिरपि स्वमतमुप-स्थापयति यत् मोक्षमारुरुक्षोर्मुनेर्मोक्षस्य सोपानपरम्पराया विद्याश्रेण्या यानि पर्वाणि चतुर्दशविद्याविभागाः सन्ति, तेषु मूलभूतं प्रथमं पदन्यासस्थानमिदं व्याकरणप्रस्थानं

सर्वासां विद्यानां साधुशब्दोपगृहीतत्वात्। शब्दशास्त्रं गृहीत्वैव शब्दविग्रहाणामनुत्तरोत्तरविद्याशृङ्खलानां सुखेन ज्ञानप्राप्तेः सुकरत्वात्। किञ्च इयं हि शब्दविद्या मुमुक्षूणां कृतेऽविनाभूतोऽकण्टकः सुगमः सरलो राजमार्गः सर्वासु विद्यासु राजमानो मोक्षस्यान्यानपेक्षं साक्षात् साधनम्। तदाह भर्तृहरि- :

"इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः"[3]।।

## परमोद्देश्यं साधुत्वज्ञानम्

शब्दशास्त्रं खलु व्याकरणशास्त्रम्। व्याकरणप्रधानग्रन्थो हि महाभाष्यम्। तस्माद् महाभाष्यानुशीलनेन दृग्गोचरतामुपैति यत् महाभाष्यशिक्षायाः परमोद्देश्यमस्ति शब्दसाधुत्वज्ञानम्। पस्पशाह्निके एव महाभाष्यकार-पतञ्जलिनोच्यते–

"अथ शब्दानुशासनम्। केषां शब्दानाम्। लौकिकानां वैदिकानां च"[4]।।

आचार्यः भर्तृहरिरपि शब्दसाधुत्वविषये स्वमतमुपस्थापयति यत् इदं साधु इत्याकारकसाधुत्वप्रकारकज्ञानं प्रतिपाद्य यस्याः सा यथा साधुशब्दज्ञानं भवेत् सा एषा व्याकरणस्मृतिः व्याकरणशास्त्रम्। यथोच्यते हरिणा-

"साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।
अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम्[5]"।।

## शिक्षायाः उद्देश्यानि

वेदानां रक्षारूपम् - पातञ्जलमहाभाष्यस्थशिक्षादिशा प्रथमोद्देश्यमस्ति ज्ञानराशिभूतानां चतुर्णां वेदानां रक्षाकरणम्। महाभाष्यकारस्य मतमस्ति यत् महाभाष्याध्ययनादध्येतारः सुष्टुप्रकारेण लोपागमवर्णविकारज्ञाः भवन्ति त एव वेदस्थमन्त्राणां सम्यग्तया रक्षां कर्तुं प्रभवन्ति। अत्र रक्षापदेनाभिप्रायोऽयं यत् उच्चारणादिदृष्ट्या त्रुटयः मा भवेत्। यथोच्यते -

"रक्षार्थे वेदानामध्येयं व्याकरणम्।
लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्
परिपालयिष्यतीति[6]"

ऊहः – विपरिणामरुपम् - "ऊहः खल्वपि । न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः । ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः । तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम्[7]" ।

आगमरूपम् - आगमोऽपि मुख्योद्देश्यत्वेन व्याकरणाऽध्ययनस्य महाभाष्यकारेण प्रतिपादितम् । आगमार्थं यत्प्रयोजनशब्दो वर्तते स प्रयोजकपरः । आगमः व्याकरणाऽध्ययनस्य फलं नास्ति अपितु व्याकरणाऽध्ययनस्य प्रयोजकः आगमः वर्तते । अत एव महाभाष्यकारेणोच्यते ।

"आगमः खल्वपि । ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति । प्रधानं च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान्भवति[8]" ।

लघुरूपम् – 'अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः' इति यथामतं लाघवप्रियाः खलु वैयाकरणाः प्रसिद्धिरिति वर्तते । तस्माद् शब्दशास्त्रं विज्ञातुं लघुत्तमोपायं चिन्तयन्ति ते । महाभाष्यशिक्षायाः अपरोद्देश्यमस्ति यत् अत्यन्तलघुनोपायेन साधुशब्दानां ज्ञानं भवेदिति । तदुक्तम् -

'लघ्वर्थे चाध्येयं व्याकरणम् । ब्राह्मणेनावश्यं शब्दा ज्ञेया इति । न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्याः ज्ञातुम्[9]' ।

सन्देहनिवारणरूपम् - महाभाष्यशिक्षायाः अन्यदुद्देश्यमस्ति यत् सन्देहस्य निवारणम् । महाभाष्याऽध्ययनेन साध्वसाधुशब्दयोः मध्ये उत्पन्नसंदेहस्य निवारणं कर्तुं शक्यते पदमेतद् साधु एतदसाध्विति । तदुच्यते-

'लघ्वर्थे चाध्येयं व्याकरणम्। ब्राह्मणेनावश्यं शब्दा ज्ञेया इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्याः ज्ञातुम्[9]'।

सन्देहनिवारणरूपम् - महाभाष्यशिक्षायाः अन्यदुद्देश्यमस्ति यत् सन्देहस्य निवारणम्। महाभाष्याऽध्ययनेन साध्वसाधुशब्दयोः मध्ये उत्पन्नसंदेहस्य निवारणं कर्तुं शक्यते पदमेतद् साधु एतदसाध्विति। तदुच्यते-

"असन्देहार्थं चाऽध्येयं व्याकरणम्। याज्ञिकाः पठन्ति स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेदेति"। तस्यां

सन्देहः स्थूला चासौ पृषती च, स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति"[10]

इति स्वरतः सन्देहनिवृत्यर्थं व्याकरणं पठितव्यमिति।

**आनुषङ्गिकोद्देश्यानि**

महाभाष्यशिक्षायाः आनुषङ्गिकोद्देश्यान्यपि दृष्टिपथमायान्ति। तत्र त्रयोदशानुषङ्गिकोद्देश्यानि विवेचितानि। तथोक्तम् -

"इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि-तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उतत्वः सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवो असि वरुणेति[11]"।

**महाभाष्यानुसारमध्यापकः**

भारतीयसंस्कृतौ गुरुस्साक्षात्परब्रह्मत्वेन स्वीक्रियते । योग्यगुरुरेव शिष्याय मोक्षोपदेशङ्करोति । महाभाष्ये महाभाष्यकार: पतञ्जलिः स्वशिष्येभ्य: स्वयमेवाऽध्यापकत्वेनोपदिशति । भगवतः पतञ्जलेः अनेके शिष्याः आसन् तथा शब्दानुशासनस्य नैकवारं प्रवचनमपि भगवान् पतञ्जलिः कृतवान् । अनेन ज्ञायते यत् गुरू: तादृशः भवितव्यः यदि यावत्यावश्यकता छात्रस्य ताः सर्वाः अपि प्रपूरणीयाः । नैकवारमध्ययनस्याऽऽवश्यकता यदि छात्रस्य वर्तते तर्हि नैकवारं प्रवचनमपि कर्तव्यम् । इदमुच्यते भाष्यकारेण 'आकडारादेका संज्ञा' इति सूत्रव्याख्यानावसरे तद्यथा -

"उभयथा हि आचार्येण शिष्याः सूत्रं प्रतिपादिताः, केचिदाकडारादेका संज्ञा इति, केचित् प्राक्कडारात् परं कार्यमिति[12]"

महाभाष्ये उदाहरणमेकमवलोक्यते यत् – 'ओदनपाणिनीयाः[13]' इत्युदाहरणानुशीलनेन ज्ञायते यदाचार्यपाणिनेः कुलमत्यन्तसम्पन्नमासीत्। पाणिनिना स्वशब्दानुशासनस्याऽध्येतॄणाङ्कृते भोजनावासादीनां व्यवस्थाऽपि कृतासीत्। छात्राः तत्र विद्यया साकं भोजनमपि प्राप्नुवन्ति स्म। एतेन सुस्पष्टं भवति यत् तस्मिन् काले गुरुरेव भोजनादीनां व्यवस्थां करोति स्म। गुरोः पार्श्वे यावदधिकाच्छात्राः भवन्ति स्म त :देव गुरोः योग्यतायाः प्रसिद्धेश्च प्रमाणभूतम्। अध्यापकः मनसा वाचा कर्मणा स्वशिष्यहित-चिन्तनमाचरेत्। अध्यापकायाऽऽवश्यकमिदं यत् सः स्वछात्रमवगच्छेत्। गुरुः स्वशिष्यं नाधिगच्छति चेत् तदनुकूलशिक्षणस्याऽऽयोजनमपि कर्तुं न शक्यते। अतएव असाधारणाचार्यात् शिक्षाऽधिगन्तव्येति। अनेनाचार्य : गुणान्वितः स्यादिति दृष्टिपथमायाति। कठोपनिषद्यपि प्रतिपादितमस्ति यत् –

"न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः। अनन्यप्रोक्ते गतिरत्र नास्ति अणीयान ह्यतर्क्यमणुप्रमाणात्[14]"।।

**महाभाष्यानुसारं शिष्यः**

योग्यशिष्या एव अध्यापकस्य योग्यतायाः प्रमाणभूताः भवन्ति। महाभाष्यानुशीलनेन दृष्टिपथमायाति यत् छत्रमिव छात्रः गुरुर्दोषान् छादयति। तथा येन प्रकारेण छत्रः उष्णादिकं निर्वर्तयति एवमज्ञानं गुरुर्निर्वर्तयति - इति तत्सदृशत्वाद्गुरुरपि छात्रस्य छत्रमिव प्रतिभाति। वृत्तौ तद्विषयपालनादौ छत्रशब्दस्य वृत्तिः। यः राज्ञश्छत्रं धारयति सः छात्रेति। अनेनानुमीयते यत् यः बालकः गुरुसेवारतोतिष्ठति सः : छात्रत्वेनाभिधीयते। महाभाष्यकार :'छत्रादिभ्यो णः' इति सूत्रव्याख्यानप्रसङ्गे प्रतिपादयन्नाह -

"किं यस्य च्छत्रधारणं शीलं स च्छात्रः **?**

किं चात :**?**

राजपुरुषे प्राप्नोति।

एवं तर्हि उत्तरपदलोपोऽत्र द्रष्टव्यः - छत्रमिवच्छत्रम्। गुरुश्छत्रम्। गुरुणा शिष्यश्छत्रवत् छाद्यः। शिष्येण गुरुश्छत्रमिव परिपाल्यः[15]"।।

महाभाष्ये इतोऽपि शिष्यस्वरुपमवलोक्यते यत् गुरुणामनुपस्थितौ शिष्याः तेषां कार्याण्यपि समाचरन्ति स्म। ते अध्यापकानामनुपस्थितौ याज्यकुलानि गच्छन्ति स्म तथा आश्रमानुशासनव्यवस्थाऽपि पालयन्ति। तद्यथा -

"एवमर्थमिदमुच्यते। गुरुवद् गुरुपुत्रे इति यथा। तद्यथा गुरुवद् गुरुपुत्रे वर्तितव्यमिति गुरौ यत् कार्यं तद् गुरुपुत्रे अतिदिश्यते"।

"तद्यथा उपाध्यायस्य शिष्यो याज्यकुलानि गत्वा अग्रासनादीनि लभते[16]"

महाभाष्ये भगवता पतञ्जलिनोदाहरणमेकं प्रस्तुतम् – 'उपसेदिवान् कौत्सः पाणिनिम्'। उदाहरणमिदमाश्रित्यैव काशिकावृत्तावप्युदाहरणद्वयं समुपलभ्यते 'अनूषिवान् कौत्सः पाणिनिम्', 'उपशुश्रुषवान् कौत्सः पाणिनिम्' इति उदाहरणैर्ज्ञायते यत् शिष्यः शुश्रुषावान् भवेत् :। निरन्तराऽध्ययनशीलो भवेत्। स्वकर्मणा सर्वदा गुरु प्रशंसेदिति।

**महाभाष्यानुसारमनुशासनम्**

अनुशासनेन हि मनुष्य उन्नतिमधिगच्छति। 'अनुशासनम्' शब्दोऽयम् 'अनु' उपसर्गपूर्वकात् 'शास् अनुशिष्टौ' इत्यस्माद्धातोः निष्पद्यते। तस्मादनुशासनशब्दस्य व्युत्पत्तिलभ्याऽर्थः नियन्त्रणमिति ज्ञायते। तच्चाऽनुशासनं द्विविधं बाह्यान्तरिकभेदाभ्याम्। बाह्यानुशासने विशेषनियमानां निर्धारणं कृत्वा छात्रस्योपरि नियन्त्रणं स्थाप्यते। समुचितपालनाभावे दण्डस्याऽपि विधानं क्रियते। भयकारणादत्र नियमपालना दृश्यते। बाह्यानुशासनान्तर्गते दण्डात्मकानुशासनेन अन्यासां बहुविधसमस्यानामप्युत्पत्तिर्जायते। द्वितीयं वर्तते आन्तरिकानुशासनमिति।

अनुशासनमिदमेवात्मानुशासनत्वेनाऽपि ज्ञायते। अत्र हि छात्रेभ्यः आत्मनियन्त्रणस्यैव प्रशिक्षणं प्रदीयते। छात्र : स्वयमेव नैतिकसामाजिकसांस्कृतिकवातावरणानुसारमाचरति। अत एव दण्डविनिर्मुक्त-मिदमनुशासनं प्रशस्यतमम्। तत्तच्छात्रेषु अनुशासनस्य भिन्नभिन्न रूपाणि - विवेचितानि। यथा भारतीयमनोविज्ञानस्य विवेचके योगशास्त्रे योगानुशासनमेव योगशास्त्रस्याऽङ्गत्वेन स्वीक्रियते। योगशास्त्राऽनुसारं चित्तवृतीणां निरोध एव योगः, यस्याऽनुशासनं योगशास्त्रस्य कर्तव्यमिति। सामान्यतः मनुष्याणां चितं विभिन्नासु दिशासु प्रवर्तते, परं तस्य प्रवृत्तीन् विपरीतदिशातअपाकृत्य लक्ष्यं प्रति : नुशासनस्य मार्ग प्रशस्करोति योगशास्त्रम्प्रेरणाय योगा। तदुकं योगशास्त्रे -

"अथ योगानुशासनम्[17]"।

अनुशासन्नाम् - पुराकालात् प्रवर्तमानायाः कस्याः अपि धारायाः समयानन्तरे निश्चितोद्देश्यं प्रति सीमितिकरणमेव यथा भाषायाः प्रवाह आदिकालादेव गम्यमानो वर्तते परं व्याकरणशास्वरूपशब्दानुशासनं तं साधुशब्दसीम्नी निर्धारणाय अनुशासनमेकं स्थापयति, येन भाषा असाधु एवम् अपरिष्कृतशब्दान् प्रति न गच्छेत् तथा स्वस्य यथार्थरूपे विद्यमाना भवेदित्येव पाणिनेः शब्दानुशासनस्य मुख्याभिप्रायः। तदुच्यते पतञ्जलिना -

"अथ शब्दानुशासनम्[18]"।

पुनः महाभाष्यानुशीलनेन ज्ञायते यत् तस्मिन् काले दण्डात्मक-मात्मानुशासनश्चेत्युभयविधाऽनुशासनस्य व्यवस्था परिकल्पिताऽऽसीत्। विद्यायां प्रमादस्याऽऽचरणेनाऽध्यापकः छात्रान् दण्डयति स्म। यथा–

"खण्डिकोपाध्यायस्तस्मै चपेटां ददाति[19]"।

पुनः आत्मानुशासनस्यान्तर्गते ज्येष्ठच्छात्रः अध्यापकस्यानुपस्थितौ स्वकनिष्ठान् छात्रान् अध्यापयति स्म। यज्ञस्य तथाऽऽश्रमव्यवस्थामपि पालयति स्म। गुरुणामनुपस्थिती तेषां दावित्यान् निर्वहन् यान्यकुलानि गत्या अग्रासनादीनि लभते स्म। यथा –

"उपाध्यायस्य शिष्यो याज्यकुलानि गत्वा
अग्रासनादीनि लभते[20]"।

**महाभाष्यानुसारं गुरुच्छात्रसम्बन्धः**

पातञ्जलमहाभाष्याऽनुशीलनात् तात्कालिकः गुरुच्छात्रसम्बन्धः मधुरं प्रतिभाति। महाभाष्यस्थ 'ओदनपाणिनीयाः' प्रयोगेणाऽनेन ज्ञायते यदध्यापकः अस्मिन् समये स्वछात्रान् पुत्रवद् पोषयति निह्युति स्म। छात्रा अपि गुरुणामादरं कुर्वन्ति स्म। गुरुभिस्साकं शिष्टाचारेण व्यवहरन्ति तथा तेषामाज्ञापालनमपि कुर्वन्ति स्म।

पुन छात्राणां सम्बन्धः केवलं गुरुभिस्साकमेव नासीत् परं : गुरुकुलस्य प्रत्येकेन सदस्येन सह अथवा एवं वक्तुं शक्यते यत् गुरुकुलसमुदायेन सह आसीत। तदुच्यते -

"समुदायापेक्षात्र षष्ठी सर्वे गुरुकुलमपेक्षते[21]"।
"समुदायेन संबन्धो येषां गुरुकुलादिना।
संस्पृश्यावयवास्ते तु युज्यन्ते तद्वता सह[22]"।।

पुनः अस्मिन् जगति बहुविधसम्बन्धास्सन्ति। महाभाष्यकारेण एकशतं इतोऽप्यधिकाः सम्बन्धाः प्रतिपादिताः परमेतेषां सर्वेषामपि सम्बन्धानामन्तर्भावः आचार्यपतञ्जलिना चतुर्ष्वेव सम्बन्धेषु कृतः। धनेन सम्पद्यमानः सम्बन्धः आर्थसम्बन्धान्तर्गते यथा स्वामीभृत्यसम्बन्धः द्वितीयः यौनसम्बन्धः यथा पितापुत्रादिसम्बन्धः, अपर मुखेन जायमानः सम्बन्धः मौखसम्बन्धः तथा अन्तिमसम्बन्धः यज्ञकर्मणि विधीयमानः सम्बन्धः स्रौवसम्बन्ध इति, यथा यजमानपुरोहितयोः सम्बन्धः। विद्योपदेशेन गुरुशिष्यः सम्बन्धोऽपि मौखसम्बन्धः वर्तते।

**महाभाष्यानुसारं विद्यापरम्परा**

महाभाष्ये भगवान् पतञ्जलिः व्याकरणविद्या परम्परां प्रतिपादयति अर्थात् व्याकरणस्याद्युपदेशः केन कृतः तथा च तदुपदेशः कस्मै कृतः इति। पुनः तदुपदेशपरम्परा केन प्रकारेण वृद्धिरधिगता। व्याकरणविद्यायाः आद्युपदेशः

ब्रह्मणा बृहस्पतये कृतः तद्यथा 'ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः[23]"।

**पुनः महाभाष्यकारेणाऽप्युच्यते**

> 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम[24]'।

**विद्याप्राप्तेरूपाया:**

ज्ञानस्य प्राप्तिः कथमिति चेत्, विभिन्नशास्त्रकारैः भिन्नाः-भिन्नाः विद्याप्राप्तेरुपायाः प्रतिपादिताः । महाभाष्यकारः पतञ्जलिरपि चतुर्धा हि विद्याप्राप्तेरूपायान् स्वीकरोति । प्रथमः गुरुणाऽध्ययनकाले, द्वितीयः गुरुमुखेनाधीतस्याऽऽवृत्तिः काले, अपरः अध्यापनकाले, अन्तिमः यज्ञादिकर्मणि । प्रयोगसमये ज्ञानस्याऽधिगमः भवति ।

**नैतिकशिक्षा**

नैतिकता मानवजीवनस्य परिधानमस्ति यत् सत्यम्, शीलम्, सदाचारादिमानवीयगुणैः परिवेष्टितं भवति। अयमेकः सामान्यराष्ट्रधर्मः वर्तते, यस्यानुपालनं विना राष्ट्रस्याऽभ्युदयं न सम्भवति। सम्पूर्णवैदिकवाङ्मये आचारशिक्षायाः अनिवार्यतोपरि बलं दीयते। श्रुतिवाक्यमपि प्रमाणभूतं वर्तते यत् 'आचारहीनं न पुनन्ति वेदाः'। मर्यादिताचरणमेव सदाचारः, यः सामाजिक-प्रतिबन्धान्तर्गते व्यक्तिं व्यवहारकरणाय प्रतिबन्धयति। यास्केन निषिद्धकर्माणि उक्तानि – 'स्तेयं तल्पारोहणं ब्रह्महत्या सुरापानं दुष्कृतस्य कर्मणः पुनः-पुनः सेवां पातकेऽनृतोद्यमिति[25]'।

**अध्ययनवेला**

पुरा छात्रेभ्यः नियमानुसारेणाऽध्ययनस्य विशेषमहत्वमासीत् । छात्राणामध्ययनकालः विभिन्नेषु विभागेषु विभक्तमासीत् । कस्मिन् समये कस्य विषयस्याऽध्ययनं करणीयमिति निर्धारितमासीत् । छात्रेभ्यः तत्तत् वेदानामध्ययनस्य कालः भिन्न-भिन्न निर्धारितमासीत् । यथा गायत्रीछन्दसः उच्चारणं प्रातःकाले करणीयमिति, त्रिष्टुप् छन्दसः उच्चारणं मध्याह्नकाले तथा जगतीछन्दसः उच्चारणं सांयम्काले कर्तव्यमिति ।

पातञ्जलमहाभाष्येऽपि महाभाष्यकारेण तत्तत् विषयाणां समयस्य निर्धारणङ्कृतम् यथा पुर्वाह्णे सामवेदस्याऽध्ययनं विधेय एवं प्रातः काले अनुवाकानामध्ययनं करणीयमिति। तदुच्यते –

> "कृत्यैर्नियोगे यत्प्रत्ययेनेति वक्तव्यम्। इहापि यथा स्यात् - पूर्वाह्णे गेयं साम प्रातरध्येयोऽनुवाक इति[26]"।

पातञ्जलमहाभाष्यस्य शिक्षा कस्याऽपि कालविशेषस्य शिक्षाप्रणाली नास्त्यपितु अस्याः सिद्धान्तानां प्रयोगः सार्वकालिकं वर्तते। पाणिनीयसूत्राणां व्याख्यानव्याजेन भाष्यकारेण सामाजिकम्, राजनैतिक तथा शैक्षिकादितत्वानां प्रतिपादनं सरलतया कृतम्।

आधुनिक शिक्षायाः लक्ष्याणां समुचितसोपानानि प्रस्तुतं करोति पातञ्जलमहाभाष्यम् । साम्प्रतं स्वास्थ्य-ज्ञान-विज्ञान-नैतिकता-आजीविकादीनां व्यवस्था शिक्षोपरि निर्भरा तत्त्वानामेतेषां पूर्तिकरणे, व्याकरणज्ञानस्य विकासेन सह पुरुषार्थचतुष्टयानां प्राप्तकरणे निश्चयेन सहायिका महाभाष्यशिक्षा ।

महाभाष्ये तात्कालीनशिक्षाव्यवस्थायाः यान्युद्देश्यानि निर्धारितानि तानि जनानाङ्कृते व्याकरणज्ञानस्य महत्वं सूचयन्ति। सम्प्रत्यध्यापकाः स्वगरिमाणं विस्मृत्य धनलोलुपतावशात् ज्ञानकृपणाक्रियाविहीनाश्च सन्ति :। शिक्षा नास्ति व्यापारादधिका यतोहि वर्तमाने धनस्य व्ययं कृत्वोपाधीनां ग्रहणमात्रं भवति। शिक्षायाः वास्तविकोद्देश्यानां प्राप्तिरपि कठिना संजाता। केवलं संख्यात्मकदृष्ट्या शिक्षासम्पादनेन भारतीयपरम्परा सदोषा भविष्यति। अत एवावश्यकता वर्तते प्राच्यग्रन्थानामनुसरणस्य, यत्र हि प्रत्येकस्याः समाधानं वर्तते। वर्तमानयुगस्य छात्रानुशासनविभीषिकायां समरसतासम्पादनं वर्तते। पातञ्जलमहाभाष्ये निरुपितास्सिद्धान्ताः एतासां समस्यानां निवारणाय आदर्शनिदर्शनानि वर्तन्ते।

**संदर्भ**


1. महाभाष्य प .आ .पृ .सं - .४१
2. वा१३२ .का .का.ब्र .प .
3. वाक्पदीयम्, ब्र१३२ .का .का.
4. महाभाष्य प .आ .पृ .स - .५
5. वाक्पदीयम्, ब्र.का. - १४३
6. महाभाष्य प .आ .पृ .स – .२०
7. महाभाष्य प .आ .पृ .स – .२२
8. महाभाष्य प .आ .पृ .स – .२३
9. महाभाष्य प .आ .पृ .स – .२६

10. महाभाष्य प .आ .पृ .स – .२८
11. महाभाष्य प .आ .पृ .स - .२८
12. पा. सू. महाभाष्ये – १/४/१
13. पा. सू. महाभाष्ये – १/४/७३
14. कठोपनिषद – १/२/८
15. पा. सू. महाभाष्ये – १/१/६२
16. पा. सू. महाभाष्ये – १/१/५६
17. पातञ्जल योगशास्त्रम्
18. पा. सू. महाभाष्ये – १/१/१
19. पा. सू. महाभाष्ये – १/१/१
20. पा. सू. महाभाष्ये – २/१/५६
21. पा. सू. महाभाष्ये – २/१/१
22. पा. सू. महाभाष्ये – २/१/११
23. ऋक्तन्त्रम् – १/४
24. प.आ. महाभाष्ये
25. निरुक्ते – ६/२७
26. पा. सू. महाभाष्ये – २/१/४२